# Shri Suryadivyakavacha Stotram 5

# श्रीसूर्यदिव्यकवचस्तोत्रम् ५

## Document Information

```
Text title : Shri Suryadivyakavacha Stotram 5
File name : sUryadivyakavachastotram5.itx
Category : navagraha, kavacha
Location : doc_z_misc_navagraha
Proofread by : PSA Easwaran
Description/comments : Hiranyagarbha Samhita
Latest update : April 25, 2020
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# श्रीसूर्यदिव्यकवचस्तोत्रम् ५

ॐ अस्य श्रीसूर्यनारायणदिव्यकवचस्तोत्रमहामन्त्रस्य
हिरण्यगर्भ ऋषिः । अनुष्टुप्छन्दः श्रीसूर्यनारायणो देवता ।
सूं बीजं, यीं शक्तिः, यां कीलकम् ।
श्रीसूर्यनारायणप्रसादसिद्ध्यर्थे जपे विनियोगः ।
करन्यासः ।
ॐ श्रीसूर्यनारायणाय अङ्गुष्ठाभ्यां नमः
पद्मिनीवल्लभाय तर्जनीभ्यां नमः
दिवाकराय मध्यमाभ्यां नमः ॥

भास्कराय अनामिकाभ्यां नमः ॥

मार्ताण्डाय कनिष्ठिकाभ्यां नमः ॥

आदित्याय करतलकरपृष्ठाभ्यां नमः ॥

एवं हृदन्यासः
लोकत्रयेति दिग्बन्धः ।
ध्यानं
त्रिमूर्तिरूपं विश्वेशं शूलमुद्गरधारिणम् ।
हिरण्यवर्णं सुमुखं छायायुक्तं रविं भजे ॥

अथ स्तोत्रम् ।
भास्करो मे शिरः पातु ललाटं लोकबान्धवः ।
कपोलौ त्रयीमयः पातु नासिकां विश्वरूपभृत् ॥ १॥

नेत्रे चाधोक्षजः पातु कण्ठं सप्ताश्ववाहनः ।
मार्ताण्डो मे भुजौ पातु कक्षौ पातु दिवाकरः ॥ २॥

पातु मे हृदयं पूषा वक्षः पातु तमोहरः ।
कुक्षिं मे पातु मिहिरो नाभिं वेदान्तगोचरः ॥ ३॥

द्युमणिर्मे कटिं पातु गुह्यं मे अब्जबान्धवः ।
पातु मे जानुनी सूर्यो ऊरू पात्वुरुविक्रमः ॥ ४॥

चित्रभानुस्सदा पातु जानुनी पद्मिनीप्रियः ।
जङ्घे पातु सहस्रांशुः पादौ सर्वसुरार्चितः ॥ ५॥

सर्वाङ्गं पातु लोकेशो बुद्धिसिद्धिगुणप्रदः ।
सहस्रभानुर्मे विद्यां पातु तेजः प्रभाकरः ॥ ६॥

अहोरात्रौ सदा पातु कर्मसाक्षी परन्तपः ।
आदित्यकवचं पुण्यं यः पठेत्सततं शुचिः ॥ ७॥

सर्वरोगविनिर्मुक्तो सर्वोपद्रववर्जितः ।
तापत्रयविहीनस्सन् सर्वसिद्धिमवाप्नुयात् ॥ ८॥

संवत्सरेण कालेन सुवर्णतनुतां व्रजेत् ।
क्षयापस्मारकुष्ठादि गुल्मव्याधिविवर्जितः ॥ ९॥

सूर्यप्रसादसिद्धात्मा सर्वाभीष्टफलं लभेत् ।
आदित्यवासरे स्नात्वा कृत्वा पायसमुत्तमम् ॥ १०॥

अर्कपत्रे तु निक्षिप्य दानं कुर्याद्विचक्षणः ।
एकभुक्तं व्रतं सम्यक्संवत्सरमथाचरेत् ।
पुत्रपौत्रान् लभेल्लोके चिरञ्जीवी भविष्यति ॥ ११॥

स्वर्भुवर्भूरोमिति दिग्विमोकः ।

इति श्रीहिरण्यगर्भसंहितायां श्रीसूर्यनारायणदिव्यकवचस्तोत्रं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Suryadivyakavacha Stotram 5*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*